# daivaGYa vallabhA Astrologer's beloved by VarAhmihir

# वराहमिहिररचिता दैवज्ञ वल्लभा

## Document Information

Text title : daivaGYa vallabhA Astrologer's beloved by VarAhmihir

File name : daivaGYavallabha.itx

Category : jyotisha, sociology_astrology, varAhamihira

Location : doc_z_misc_sociology_astrology

Author : varaahamihira

Transliterated by : Manish Shrivastaw shrimanishmaharaj at yahoo.co.in

Proofread by : Manish Shrivastaw shrimanishmaharaj at yahoo.co.in

Latest update : December 20, 2003

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# वराहमिहिररचिता दैवज्ञ वल्लभा

॥ ॐ ॥

DaivaGYa VallabhA text summary and encoding by Manish Shrivastaw

Prashna shastra is a unique and spinal branch of astrology, after all everyone has queries to be answered primarily. Daivagya VallabhA is also unique amongst other books on the subject, yet has been low profile, so much so that it arises some doubts about it’s authorship, as Acharya Varahamihir’s other works are very popular, e.g. BrihajjAtakam or Hora shastra, panchasiddhantika, brihatsamhita etc. It seems Varaha wrote it as a key book or guide in his early days. Here he worships Nrihari in the beginning (mangalacharana) not Surya as in his later works. In the end we can see that the author is putting in his personal experiences as if in a diary, when he discusses planets changing the direction of travel in certain positions. (37-40/ 15) Perhaps it was written before his famous Yogayatra, which deals with traveling in general. Varaha’s son PrithuyashA wrote Hora SAra on the lines of his father’s Hora shastra better known as Brihajjatakam. Prithuyasha is better known for his book on Prashna vidya, ShaTpanchashika which consists of 65 verses discussing some fundamental combinations of horary astrology. All these yogas exist in Daivagya Vallabha. A son gets inspired, if at all, by his father’s magnificent work to preserve his heritage, not by someone else. May be Varahamihir wrote this book to teach his son Prithuysha, their traditional knowledge. We can see in the end as author explains thoroughly in Lagnachinta adhyAya (15th chapter) about wars, king and army’s fate, subjects chiefly concerned and almost the question of

survival, literally for an astrologer in 6th century. In many occasions, names of earlier experts like Manittha, Maya, Satya, Bali, Yavanacharya have been taken with respect, here we can observe Varahamihir never had any qualms in accepting Yavana (Greek) mata as he was progressive and liberal, not rigid in views. The language, poetic style, insight behind combinations, synonyms of planets, signs, houses etc. don't sound modern at all. The book has covered everything, prashna lagna, determining the lagna (ascendant) by various means, PrashnakShar paddhati (initial letter of query) Shakun vichar (omens), prediction by Dreshkana, Trimshamsha, all these methods contribute to prove this text's era. Apart from it's author's name this book alone is enough to praise the person who created it, simply for it's excellent contents.

In 1st chapter Prashnavatar planet's conditions (avasthA) are described, definitions like Pravriddhavirya or ParihiyamAnvirya (for planet transiting towards it's exaltation or debilitation signs) are never heard of. Author discusses duties of answer seeker and astrologer both, the basics of making prediction.
In 2nd chapter ShubhAshubha author describes 'significators' or things covered by all 12 houses (bhAva kArakatva) and some basic principles. In 3rd chapter LAbhAlAbha combinations indicating financial profit or loss, are given. In 4th chapter SamanyagamAgam some basic yogas of travel, arrival or departure, are discussed.
5th chapter ShatrugamAgam deals with enemy's attack on one's country. 6th chapter PravAsachinta deals exclusively with the state of person gone abroad, his well being, possible arrival or captivity.
7th chapter JayaparAjaya deals with war queries explicitly, who'll be victorious, aggressor (YAyi) or attacked one (SthAyi).
8th chapter Rogashubha points out combinations for patient's health, recovering from or succumbing to disease. 9th chapter is about larceny, lost wealth's recovery, identification of thief. 10th

chapter ManomushtichintA answers silent queries in a rational way, explaining the size, color, sex of planets, leading to determine if it's living organism, animal, flora, or unanimated metal, a person is thinking about.
11th chapter Vrishtinirnaya briefly suggests rain indicating combinations. 12th chapter VivAhavichar is for concerns about marriage while 13th chapter Stripunjanma deals with child birth. 14th chapter Prakirna as the name suggests consists everything which the author thinks should not be left out. Relationship with others, planet's taste in food (e.g. if a planet is retrograde, dish having taste indicated by this planet, will be offered repeatedly to the person in question, yet he will refuse to eat it! 11/14), body parts indicated by Dreshkana (1/3rd of sign) wound marks etc on them for identifying or just surprising someone. Another method of telling whether a job can be accomplished or not, Shanku ChAya and Svapna (dreams) their result and timing of coming true, answering from 1st letter of question asked, dividing alphabets in 8 chapters governed by 7 planets (a, ka, cha, Ta, ta, pa, ya, sha varg) are all accumulated here. In 15th chapter Lagnachinta again the author describes fate of war strikes, army's every aspect, journey, food, camping, vehicles, loopholes etc are determined by Dreshkana. In the end he suggests favorable traveling times and combinations of unexpected journey.

Reading a book on astrology not only improves our knowledge on this special subject but also introduces us to ancient times and lifestyle as Jyotish covers all walks of life. I hope readers will enjoy it!
- Manish Shrivastaw. 21-12-2003.

## ॥ १ प्रश्नावताराध्यायः ॥

नत्वोद्गिरन्तमनलं भैरवमद्वैतमीश्वरं नृहरिम् ।
वराहेणैषा क्रियते प्रश्ने दैवज्ञवल्लभारचना॥ १॥

दीप्ताद्यं दशभेदं व्योमचराणां निरूप्य भावफलम् ।
पृष्टो यद्यत्कथयति शुभाशुभं तत्तदन्यथा नोक्तम्॥ २॥

दीप्तो दीनः स्वस्थो मुदितः सुप्तः प्रपीडितो मुषितः ।
परिहीयमानवीर्यः प्रवृद्धवीर्योऽधिवीर्यश्च॥ ३॥

स्वोच्चे दीप्तो नीचे दीनः स्वगृहे व्यवस्थितः स्वस्थः ।
मुदितो मित्रगृहस्थो रिपुगेहस्थो भवेत्सुप्तः॥ ४॥

अन्यैर्विजितो युद्धे निपीडितोऽस्तंगतो मुषितः ।
परिहीयमानवीर्यो नीचाभिमुखं प्रसर्पश्च॥ ५॥

गच्छन् स्वोच्चाभिमुखं प्रवृधवीर्यः समाख्यातः ।
शुभवर्गस्थः खेटोऽधिकवीर्यो विपुलरश्मिश्च॥ ६॥

दीप्ते सिद्धिरनुत्तमा नरपतेर्दीने च दैन्यागमः
स्वस्थे स्वे मनसि स्थितं च भवति श्रीकीर्तिसौख्यादिकम् ।
आमोदो मुदिते यथेप्सितफलप्राप्तिः प्रसुप्ते विप-
-त्पीडाशत्रुकृता प्रपीडिततनौ मोषं गतेऽर्थक्षयः॥ ७॥

भवति प्रवृद्धवीर्ये गजतुरंगसुवर्णभूलाभः ।
तद्वदधिवीर्ययुक्ते शक्तित्रयसम्पदादिबाहुल्यम्॥ ८॥

पुष्पैः फलैः कनकरत्नयुतैः स्वभूमौ
नक्षत्रजातिसहितं ग्रहराशिचक्रम् ।
श्रद्धां अभ्यर्च्यं भक्तिभरबंधुकंधराग्रः
विधाय निजचेतसि निर्विकल्पे॥ ९॥

प्रातः पुमान्विहितदेवगुरुप्रणामः पाणौ
वहन् कुसुमरत्नफलाक्षताश्च ।
सत्कृत्य दैवविदमादरमादधानः
पृच्छेत्सकृच्छुभमनाः शुभदिङ्मुखस्थः॥ १०॥

प्रश्नाक्षरैरुदयहेतुभिरुल्लसद्भिर्बाह्यस्थितैश्च
शकुनैरधिगम्य सम्यक ।
प्रष्टुः शुभं च यदि वाप्यशुभं प्रयत्नात्तत्कालजं
तदिह दैवविदाऽभिधेयम्॥ ११॥

फलभरकुसुमाभिरामभूमिरुहभुवि गोमयपुष्पतोयवत्याम् ।
चरणसुखकृति प्रपृच्छतां स्यादभिमतसिद्धिरसंशयेन पुंसाम्॥ १२॥

दृक्केतसोः सुखकरी यदि भूमिरस्ति
मांगल्यवस्तुविषये शुभदर्शने चेत् ।
प्रच्छाविधौ शुभमुपस्थितमादरेण
तत्रापि वाच्यमिति वक्ति मयो मणित्थः॥ १३॥

॥ २ शुभाऽशुभाध्यायः॥

प्रष्टुः शुभैः पञ्चभिरिष्टलाभोऽनिष्टप्रदैः पञ्चभिरप्यनिष्टम् ।
तुल्यैर्बलाबलवशात्फलमूहनीयं ज्ञेयं चतुर्भिरथ वापिफलं बलाच्च॥ १॥

भावः स्वेशेनेक्षितो वा युतः स्यात्पापादन्यैर्वापि तस्यास्ति वृद्धिः ।
सौम्या यस्यान्त्यास्तखस्वांबुगा वा पापैरेवं हानिरादेशनीया॥ २॥

पर्यायसंज्ञा चैतेषां कथ्यते मुनिसंमता ।
कार्यसंज्ञा च तस्योक्ता तस्मात्प्रश्नविचारणा॥ ३॥

आरोग्यपूजागुणकल्पवृत्तमायुर्वयोजातिरदोषसौख्यम् ।
क्लेशाकृती लक्षणरूपवर्णास्तद्भागिनेयस्य वधूस्तनौ स्यात्॥ ४॥

माणिक्यमुक्ताफलरत्नधातुद्रव्याम्बरस्वर्णहयादिकार्यम् ।
रूप्यं सधान्यक्रयविक्रयादि साधारणंतद्भवति द्वितीये॥ ५॥

स्नुषानुजक्षेमसुबुद्धिलाभभृत्यादिदासीभटकर्मकर्तुः ।
भ्रात्रादिचिन्ताविषयं समग्रं पर्यायमेतत् कथितं तृतीये॥ ६॥

गृहं निधानं विवरप्रवेशो महौषधक्षेत्रखलादिवाटी ।
सुहृज्जलं वै पितृपप्रयोगो गमागमौ ग्रामसुखादिकं च॥ ७॥

स्थानच्युतिर्लाभगृहप्रवेशो वृद्धिर्जनित्री जनकश्च तद्वत् ।
देशादिकार्याण्यपि लाभमस्य पर्यायमेतत्कथयन्ति तुर्ये॥ ८॥

नानाप्रयोगो विनयप्रबन्धविनेयविद्यानयबुद्धिमंत्राः ।
संधानगर्भाङ्गभवादिकं च प्रज्ञासुतार्थस्य च पंचमे स्यात्॥ ९॥

अस्वास्थ्यदौस्थित्यविपक्षदासक्रूरोग्रकर्मापरकृत्यशङ्काः ।
युद्धादितन्मातुलमाहिषाद्यं रोगोऽपि चिन्त्यो रिपुभावतुल्यः॥ १०॥

वस्तुक्रयस्वास्थ्यवणिज्यवादकामोदयो दासकलत्रचौर्यम् ।
निवृत्तिस्वस्त्रेयगमागमाद्यं कलत्रपर्यायमिदं निरुक्तम्॥ ११॥

आयुर्विरोधो निधनं च राज्यं भेदोऽथ वा बन्धुजनस्य छिद्रम् ।
वैषम्य दुर्गादिकलत्रशत्रुवधो नदीतारणमष्टमर्क्षे॥ १२॥

स्वाध्यायदीक्षासुरगेहयात्रा नृपाभिशेको गुरुधर्मकृत्यम् ।
जलाशयश्यालकदेवरादीन् भ्रातुर्गृहिण्यो नवमस्य पूर्वैः॥ १३॥

आकाशवृत्तान्तजलप्रपातः स्थानं पितुः कार्यसुखादिमानम् ।
पुण्यं नृपत्वं च तथाऽधिकारो मुद्राच्युतिस्तद्दशमस्य तुल्यम्॥ १४॥

कार्यस्य वृद्धिः क्रयवृद्धिलब्धिर्गजाश्ववस्त्रादिकयानशय्याः ।
स्वर्णानुवित्तापहृतादिकन्यालाभो गजादेः श्वसुराद्यमाये॥ १५॥

त्यागादिभोगेष्टिविवाहदानकृष्यादिकर्मव्ययसंक्षतिश्च ।
पितृव्ययमातृष्वसृमातुलानीयुद्धेक्षणं युद्धपराजयोऽन्त्ये॥ १६॥

यद्यद्भावेषु यद्वस्तु कथितं यवनादिभिः ।
तत्कार्यसंज्ञमाख्यातं ततः प्रश्नविचारणा॥ १७॥

यस्य भावस्य यद्वस्तु प्रश्नमात्रे प्रकाशितम् ।
तत्पृच्छायां तु तल्लग्नमेवं वा पूर्ववद् भवेत्॥ १८॥

यद्यद्भावेषु यत्कर्म तस्माल्लग्नव्यवस्थितिः ।
अतीतानागते कार्ये त्वतीतानागतादपि॥ १९॥

मूर्द्धोदये सौम्यविलग्नगे वा लग्नेऽपि वा सौम्ययुते शुभं स्यात् ।
अतोऽन्यथात्वे तु तदन्यथात्वं मिश्रं विमिश्रैरधिकं बलाढ्यैः॥ २०॥

केन्द्रोपगा नवमपंचमगाश्च सौम्याः केन्द्राष्टवर्ज्यमशुभास्त्रिषडायसंस्थाः ।
सर्वार्थसाधनकराः परिपृच्छतां स्युरेभिर्विपर्ययगुणैस्तु विपर्ययः स्यात्॥ २१॥

केन्द्रादिनाथो यदि लग्नगः स्यात्तन्मित्रमेतस्य च केन्द्रगं वा ।
व्ययाष्टकेन्द्राण्यपहाय पापाश्चान्यत्र याता यदि तच्छुभं स्यात्॥ २२॥

नरराशिलग्नमभिवीक्षितं शुभैरुदयास्तबन्धुदशगैः शुभैस्तथा ।
त्रिकलाभषष्ठभगतैस्तथाशुभैः शुभलाभवित्तविषयांस्तदा वदेत्॥ २३॥

कन्यातुला च मिथुनं च घटो नृराशिश्चैतेषुसौम्यसहितेषु शुभं विभाव्यम् ।
पापा व्ययायभगता न शुभा विलग्ने पापः शशी न शुभदो दशमे शुभश्च॥ २४॥

चतुष्पदे वा द्विपदे विलग्ने पापग्रहस्तेन तदीक्षितेश्च ।
शुभग्रहैस्त्वीक्षित एव वृद्धिं नृराशिलग्ने तु शुभं समस्तम्॥ २५॥

उदयतुहिनदीधिती भवेतां यदि च शुभैरभिवीक्षितौ तदानीम् ।
शुभमशुभमतोऽन्यथेत्यभीष्टं गुणिगणमौलिमणेः शशिप्रभोस्तु॥ २६॥

---

## ॥ ३ लाभाऽलाभाध्यायः॥

लाभास्तपंचसहजेषु शुभग्रहाः स्युर्लाभप्रदा ददति नेष्टफलानि पापाः ।
स्थानं शुभा दशमसप्तमगाश्च दद्युर्मानार्थदा द्वितीयपंचमलग्नगाश्च॥ १॥

चन्द्रं सप्तदशद्विषष्ठसहजायस्थानसंस्थं शुभः
पश्येद्वै प्रमदाकृतं शुभफलं लाभादिकं
स्यात्तदा ।
लग्नाष्टत्रिनवात्मजेषु च भयं कायार्थनाशोऽशुभै-
-रेतेष्वेव गताः शुभास्तु शुभदा
मानार्थसम्पत्तये॥ २॥

त्रिकोणकेन्द्रालयगाः शुभग्रहास्तथाऽशुभाश्च त्र्यरिलाभगा यदि ।
भवन्ति लाभाय तदाऽऽशु पृच्छतां विपर्ययस्थास्तु न लाभदा अमी॥ ३॥

चन्द्रश्चतुर्थे यदि सप्तमे शुभो विलग्नगो वा दशमे विवस्वान् ।
सद्योऽर्थलाभो मनुजस्य वाच्यस्तदेति सत्यो बलिरेवमाह॥ ४॥

वृषहर्य्यालिघटैः स्थानप्राप्तिं वदेन्न चरराशौ ।
द्वितनौ लग्नोपगते चरस्थिरोक्तं फलं दलतः॥ ५॥

---

## ॥ ४ सामान्यगमाऽऽगमाध्यायः॥

स्थिरे विलग्ने न गमागमौ स्तश्चरे विलग्ने तु विनिश्चितौ तौ ।
मिश्रं फलं स्याद्वि तनौ तदर्धं द्वये चरस्थावरवत्तदूह्यम्॥ १॥

सूरसौरिगुरुसौम्यसितानामेककोऽपि चरलग्नगतश्चेत् ।
आशु तर्हि गमनं स्पृहणीयं वक्रतामुपगतस्तु न हीति॥ २॥

स्थिरराशिलग्नवर्ती गुरुबुधसितभास्करेषु यद्येकः ।

गन्तुः पथो निवृत्तिं जनयति निःसंशयं प्रश्ने॥ ३॥

रविर्वा गुरुर्वा बुधो वा सितो वा भवेदायराशिस्थितः प्रश्नकाले ।
गतिः प्रच्छतः शीघ्रमेवाभिधेया निवृत्तिं पथोऽमीभिरन्त्यालयस्थैः॥ ४॥

सौरांगिरसोः पश्येदेकोऽपि वा स्थिरं समुद्यन्तम् ।
प्रष्टाऽऽगमनं प्रच्छेत्तस्यागमनं न वक्तव्यम्॥ ५॥

षष्ठत्रिकोणसंस्थैः पापैश्च पापसंदृष्टैः ।
गमनागमनं च वाच्यं स्थिरलग्ने चेच्चरे तु विपरीतम्॥ ६॥

चन्द्रतोऽथ यदि वा विलग्नतो द्वादशद्वितयराशिगामिनः ।
शुक्रवाक्पतिशशान्कनन्दनाः का गमाऽऽगमकथाऽस्ति पृच्छतः॥ ७॥

बलेन सर्वोत्तमतामुपागतो ग्रहो गृहे यावति लग्नतो भवेत् ।
प्रवासतस्तत्समसंख्यमासतो निवर्तनं गन्तुरसंशयं वदेत्॥ ८॥

चरांशकस्थे किल काल एष स्थिरांशके तद्विगुणस्तु वाच्यः ।
द्विदेहलग्नांशगते ग्रहे तु विचिन्तितस्तत्त्रिगुणो विधेयः॥ ९॥

यातुः पृच्छालग्नतः सप्तमस्य स्वामी यायाद्यावता वक्रभावम् ।
कालेनैति प्रस्थितस्तावतेति प्राहुस्त्वेते प्रश्नतत्त्वप्रवीणाः॥ १०॥

---

॥ ५ शत्रुगमागमाध्यायः॥

पापै रिपुस्थैर्यदि वा सुतस्थैर्निवर्तते वर्त्मत एव शत्रुः ।
चतुर्थगैरन्तिकसंगतोऽपि पराङ्मुखो गच्छति भग्नसैन्यः॥ १॥

चतुर्थगैरलिमीनकर्कटैः पराजयो भवति शुभैर्विलोकनात् ।
चतुष्पदैः पुनरिह तुर्यवर्तिभिः पलायते नियतमरातिरागतः॥ २॥

चरोदये भवति यदा शुभग्रहस्तदा भृशं जनयति यायिनां शुभम् ।
चरोदये त्वशुभसमन्विते शुभं स्थिरोदये भवति शुभं व्यवस्थया॥ ३॥

स्थिरे शशांके चरराशिलग्ने नवांशके वाऽस्यरिपुस्तदैति ।
चरे शशांके स्थिरराशिलग्ने नवांशके तस्य तु वा गमः स्यात्॥ ४॥

शीतगौ द्वितनुराशिसंस्थते लग्नतामुपगतो यदि स्थिरः ।
शत्रुरेत्य विनिवर्ततेऽरिभे ज्ञेज्तशुक्रसहिते विनश्यति॥ ५॥

लग्ने स्थिरे गुरुशनैश्चरदृष्टिदृष्टे शत्रोर्नवा गमनमागमनं न वा स्यात् ।
पापास्त्रिपंचरिपुगा रिपुसंगमाय तुर्ये स्थिताः पुनररातिनिवर्तनाय॥ ६॥

चन्द्रश्चरे द्वितनुलग्नमथो पथोऽर्धमागत्यगच्छति रिपुर्द्वितनौ च चन्द्रे ।
लग्ने चरे रिपुरुपैति बलद्वयेन पापेक्षणाद्भवति तस्य पराजयोऽपि॥ ७॥

चन्द्राकौं यदि हिबुके स्थितौ भवेतामत्युग्रं न हि परचक्रमभ्युपैति ।
आक्रान्तं गुरुबुधभार्गवैश्चतुर्थं स्थानं चेत्त्वरितमुपैत्यरिस्तदानीम्॥ ८॥

सिंहाजकोदंडवृषा भवन्ति विलग्नगा वापि चतुर्थगा वा ।
ग्रहेण युक्ता यदि वा वियुक्ता ध्रुवं तदा तिष्ठति नैव शत्रुः॥ ९॥

रवौ गुरौ वा स्थिरलग्नगामिनि स्थितो रिपुः स्वाश्रम एव निश्चलः ।
रवौ गुरौ वाथ चरोदयस्थिते वदेदरातेरचिरात्समागमम्॥ १०॥

सुराचार्यदेवद्विषन्मन्त्रिणौ द्वौ द्वितीये तृतीये यथा वा तथा वा ।
तदा क्षिप्रमायात्यरातिः स्थिरस्थैर्न लग्नेशधर्मेशकर्मेशभेशैः॥ ११॥

यावत्संख्यं भवति रजनीनाथगेहं विलग्ना-
-न्नैकोऽपिस्यान्नियतमनयोर्मध्यवर्ती ग्रहश्चेत् ।
तावत्संख्यैरपि गतदिनैः शत्रुरागच्छतीति
ज्योतिर्विद्याविपुलगणकग्रामणीरुद्गृणाति॥ १२॥

॥ ६ प्रवासचिन्ताध्यायः॥

लग्नतः सहजपुत्रवित्तगा दूरगागमनशंसिनो ग्रहाः ।
नष्टलम्भनकराः शुभग्रहाः शीघ्रमागमकरौ तु मन्त्रिणौ॥ १॥

बृहस्पतौ केंद्रगते तु कश्चन ग्रहो भवेत् षष्ठगतोऽथ सप्तमः ।
भवेत्तदा प्रोषित पूरुषागमस्त्रिकोणगे चन्द्रसुते सितेऽपि वा॥ २॥

अष्टमे शशिनि पापवर्जिते कंटके सुखमुपैति चाध्वगः ।
कण्टकस्थितशुभग्रहैः शुभं स्वं निवासमयेति लाभवान्॥ ३॥

पृष्ठे लग्ने पापदृष्टे वधो वा बन्धो वा स्यात्सौम्यदृष्टे तु न स्यात् ।
पापे षष्ठे केन्द्रगे वा तृतीये नष्टो भ्रष्टः स्थानतः प्रच्युतो वा॥ ४॥

यथा तथा यदि भवतः कथंचन द्वये त्रये सुरगुरुदैत्यमंत्रिणौ ।
प्रवासिनां भवति तदाऽऽगमो नृणां तुरीयगौ नियतगृहप्रवेशदौ॥ ५॥

पापकैः षष्ठलाभत्रिकस्थायिभिः सौम्यकैः किंच केंद्रत्रिकोणस्थितैः ।
दूरगस्यागमो निर्विशंकं स्फुटं जल्पनीयो ग्रहग्रंथविद्भिः सदा॥ ६॥

अशुभर्क्षगतोऽशुभैश्चदृष्टश्चतुरस्त्रगृहेऽथवा त्रिकोणके ।
दिवसेश्वरनंदनोऽध्वगानां नियतं शंसति बन्धनं तदानीम्॥ ७॥

शुभयुक्ते स्थिरलग्ने सुस्थिरबन्धश्चरे त्वशुभयुक्ते ।
क्षिप्रं भवति विमोक्षो द्वितनौ कालक्रमान्मोक्षः॥ ८॥

अरिभिरवलोक्यमानास्त्रिकोणयामित्रगा पापाः ।
पृष्ठोदयं विलग्नं सौम्यादृष्टं च पन्थमरणाय॥ ९॥

अध्वस्थाने सौम्यैरध्वा निरुपद्रवोऽध्वनीनस्य ।
भयरोगपरिक्लेशाः पापैर्लग्नस्थितैस्तस्य॥ १०॥

गृहे ग्रहो यावति लग्नतो भवेत्तदा हता द्वादश राशयः स्फुटम् ।
अवेहि तावद्दिवसैर्गतागमं निवर्तनं वक्रगतग्रहेण च॥ ११॥

॥ ७ जयपराजयाध्यायः॥

दशमसप्तमलग्नगताः शुभा नगरवासिनृपस्य जयप्रदाः ।
शनिकुजौ नवमे भयभंगदौ विजयदा गुरुभार्गवचन्द्रजाः॥ १॥

नागराश्वक्रभागैस्तृतीयादितः प्रश्नलग्नाश्च धर्मादितो यायिनः ।
तत्र सौम्येन जुष्टौ जयप्राप्तिदः पापजुष्टस्तु भागो भवेद् भंगभाक्॥ २॥

मिश्रयुक्ते विमिश्रं फलं निर्दिशेत्तद्विरूपं फलं केचिदाक्षते ।
पंक्तिलाभव्ययस्थास्तु पापग्रहा यातुरिष्टाः परं तत्पुरस्याशुभाः॥ ३॥

मिथुनतुलाघटकन्यामेषाणामेकको ऽपि पापयुतः ।
यदि भवति तदा विजयो गन्तुः स्थास्नोभवेद्भंगः॥ ४॥

लग्ने नृराशिभवने यदि सन्ति सौम्याः केन्द्रव्ययायभवनेष्वशुभा भवन्ति ।
सन्धिस्तदा द्रुततरं प्रवदेन्नराणां पापैर्द्विदेहगृहगैस्तु विरोधमाहुः॥ ५॥

केन्द्रस्थिता यदि शुभा यदि वा भवन्ति लग्ने नृराशिभवने शुभदृष्टि पुष्टः ।
प्रीतिस्तदा भवति पापविलोकितैस्तु पापैरमीषु भवनेषु भवेद्विरोधः॥ ६॥

अशुभग्रहस्थलग्ने बलिभिस्त्वशुभैश्च वीक्षिते युक्ते ।
युद्धं महदादेश्यं क्षुद्रं सौम्यग्रहैर्दृष्टे॥ ७॥

सूर्यसमीरणसुरगुरुशुक्रान् समरे पृष्ठतः कृत्वा ।
जयति परान्केवलमपि परमफलं प्राह यवनेन्द्रः॥ ८॥

केन्द्रगमर्कं केन्द्री यदि शनिरुद्वीक्षिते तदा भंगः ।
एवंविधशनिदृष्टे मृत्युगतेऽर्के भवेन्मृत्युः॥ ९॥

लग्ने रवावष्टमगे शशांके कुजार्कजाभ्यामवलोक्यमाने ।
अर्केऽष्टमे लग्नगते च चन्द्रे भङ्गो भवेत् प्रष्टुरसंशयेन॥ १०॥

जीवज्ञसूर्यभृगुजास्तनये हि लोकदुश्चिक्यलग्नभवने परिपृच्छतः स्युः ।
लाभस्थिताश्च शशिभास्करिभूमिपुत्रा यायी विजित्य रिपुमेति गृहं कृतार्थः॥ ११॥

लग्ने वा क्षितिसुतमन्दयोः सुतस्थे जीवेऽर्के दशमगृहाश्रिते विलग्नात् ।
लाभे वा नभसि सितेन्दुपुत्रयोर्वा प्रश्नैवं समिति रिपूञ्जयत्यवश्यम्॥ १२॥

जीवतीव्रकरशीतमयूखैर्लग्नशात्रुदशगैर्जयसिद्धिः ।
तद्वदेव गुरुभार्गवसूर्यैर्लग्नशात्रुदशगैरवधार्यम्॥ १३॥

आये गुरौ स्यात्सचिवस्य लाभः कर्मस्थयोः सूर्यजभौमयोश्च ।
चतुर्थगे ज्ञेऽष्टमगे शशांके जायास्थिते चापि भृगौ जयः स्यात्॥ १४॥

दशमगेहगते क्षितिनन्दने किरणमालिनि लाभगृहं गते ।
सहजगेऽर्कसुते रिपुगे विधौ तदितरैरुदयालयगैर्जयः॥ १५॥

भूमिनन्दनतीव्रभानुशनैश्चरैः सहजस्थितैर्लग्नगैश्च
शुभग्रहैरिह प्रच्छतां विजयः स्फुटः ।
लग्नशालिनि वा गुरौ विशुभैस्तु लाभगृहगतैः
कर्मगैरथवा जयो भवतीति चाह पराशरः॥ १६॥

क्षितिसुतसूर्यसुतौ यदि षष्ठे सुरगुरुचन्द्रमसौ यदि विलग्ने ।
शशिसुतदैत्यगुरू यदि चाये दिवसकरो दशमे जयाय॥ १७॥

नवमात्मजलग्नगैरिह स्याच्छनिशीतांशुकुजैर्नृपस्य भंगः ।
वसुधासुतदृष्टयोर्विलग्ने शशभृन्मन्दगयोर्भवेच्च मृत्युः॥ १८॥

अष्टमे कुजयुते शनैश्चरे लग्नगे च मरणं दिवाकरे ।
त्र्यायमृत्युषु च रोहिणीपतौ स्याद्वधः समिति भास्करानुगे॥ १९॥

कुजबुधशनिभिः स्मरस्थितैर्भवति रिपूनथ गच्छतो वधः ।

उदयगृहगयोः सितारयोरपि च रिपूपचयः क्षुधामृति॥ २०॥

विज्ञेयाः क्षितिसुतमन्दयोर्विलग्ने षष्ठर्क्षे बुधसितयोरिहाष्टमर्क्षे ।
तीक्ष्णांशोर्ध्रुवमिति पापिनो रिपूणां संग्रामे पटुतरमन्त्रिणो वधाय॥ २१॥

विलग्नात्मजस्थानसंस्थैरवश्यं वधं प्रष्टपुत्रस्य जानीहि पापैः ।
सचन्द्रे कुजे लग्नगे सौरिदृष्टे पुनः संगरे भंग एवं प्रदिष्टः॥ २२॥

द्यूननैधनगते सितद्युतौ लग्नगामिनि च तीक्ष्णदीधितौ ।
गच्छतः समिति वा विपर्यये त्रासभंगमरणागमा ध्रुवम्॥ २३॥

द्वित्रिकेन्द्रस्थितैः पापरूपैर्ग्रहैः शक्तिहानिं वहद्भिः स्वकीयांशुभिः ।
अष्टमस्थे निशानायके भूभुजां बन्धनाशात्ययाः स्युः रणे पृच्छताम्॥ २४॥

द्यूने महीनन्दनचन्द्रयोः स्याद् बुधोऽर्कलग्ने स्वबलस्य भेदः ।
यमारयोस्तद्वदवेहि भङ्गं युद्धे बुधाहस्करयोस्तथैव॥ २५॥

सर्वैरमीभिर्नवमस्थितैऽतु हन्यान्नृपो मंत्रिपुरोहितादीन् ।
अत्रैव योगे च शशी विलग्ने स देशिकाश्वस्थपतिस्वपुत्रान्॥ २६॥

अर्कसूर्यसुतयोश्च विलग्ने दृष्टयोश्चधरणीतनयेन ।
अस्तगे शशधरे बलहीनैर्वाहिनीपतिवधः किल सौम्यै॥ २७॥

अस्तगे शशिना लग्नगे रवावष्टमे कुजशनैश्चरौ यदा ।
ज्ञस्तृतीयगृहगस्तदा रणे मंत्रिणा सह विहन्यते नृपः॥ २८॥

शीर्षोदयं ज्ञुभसुहृद्ग्रहयुक्तदृष्टं लग्नं शुभा बलयुताः शुभवर्गलग्ने ।
सर्वार्थसिद्धिदमतोऽन्यदनिष्टमेव प्रस्थानजन्मफलयुक्तिभिरन्यदूह्यम्॥ २९॥

## ॥ ८ रोगशुभाध्यायः॥

लग्नस्थितो वाऽष्टमसंस्थितो वा पापग्रहो यस्य तु जन्मराशिम् ।
निरीक्षते तस्य गदार्दितस्य निःसंशयं मृत्युमुदाहरन्ति॥ १॥

पृष्ठोदये विलग्ने क्रूराः केन्द्रेऽष्टगः शशी यस्य ।
रोगार्तस्य विनाशो दृष्टे वा बलयुतैः पापैः॥ २॥

शशिनं शशिपुत्रं वा पश्यति पापो विलग्नगेहस्थम् ।
आदेष्टव्यः प्रष्टुः कष्टो व्याधिर्न संदेहः॥ ३॥

सौम्यग्रहा यदि सुतस्मरमृत्युसंस्थाः पापा भवन्ति च शुभग्रहदृश्यमानाः ।
आयत्रिषड्दशमगश्च निशाकरः स्यात् तस्माच्छुभाश्च यदि वा शुभमाहुरस्य॥ ४॥

पापेक्षितः पापयुतः शुभानां दृग्योगहीनो नवमः शनिश्चेत् ।
तदा रुजार्तः परदेशगः स्यात् षष्ठाष्टमे मृत्युकरस्त्ववश्यम्॥ ५॥

उपचयगृहगे चन्द्रे शुभेषु केन्द्रत्रिकोणनिधनेषु ।
शुभदृष्टे वा लग्ने रोगी देशान्तरे नीरुक्॥ ६॥

लग्नगतः परिपूर्णो रजनिजानिर्विलोकितो गुरुणा ।
केन्द्रे वा गुरुभृगुजौ रोगार्तस्तत्र नीरोगः॥ ७॥

प्रश्नश्चेत्स्थिरलग्ने तदा न मरणं न रोगशान्तिर्वा ।
चरलग्ने विपरीतं द्विदेहलग्ने तु पूर्वमिव॥ ८॥

---

॥ ९ नष्टलाभाऽलाभाध्यायः॥

स्थिरोदये वा यदि वा स्थिरांशे वर्गोत्तमे वा यदि वा विलग्ने ।
तत्रैव तच्चोरितमस्ति वस्तु स्वकेन केनापि चरे परैस्तु॥ १॥

द्विशरीरराशिलग्ने प्रतिवेशिजनेन हृतमुदाहार्यम् ।
तत्रस्थं स्थिररशौ चररशौ तच्च सञ्चलितम्॥ २॥

लग्ने प्रजाते द्वितनौ हृतं स्वं गृहाद्बहिर्निर्गमितं विचिन्त्यम् ।
हर्ता सवीर्य्यास्तगखेटतुल्यो नौजे नृदृष्टे दयिताऽन्यथातः॥ ३॥

लग्नांशकादपहृतद्रविणस्य जातिर्द्रेष्काणतस्तदपहर्तृजनस्वरूपम् ।
दिग्देशकालकलनं किल राशितः स्याल्लग्नांशकाद्भवति जातिवयोविभागः॥ ४॥

वयांसि तेषां स्तनपानबाल्यव्रतस्थिता यौवनमध्यवृद्धाः ।
अतीव वृद्धा इति चन्द्रभौमज्ञशुक्रजीवार्कशनैश्चराणाम्॥ ५॥

रवीन्दुयुक्ते शनिभौमदृष्टे सिंहोदयेऽन्धः किल तस्करः स्यात् ।
वामेन काणः शशिनि व्ययस्थे स चक्षुषाऽन्येन रवौ व्ययस्थे॥ ६॥

क्रूरः षष्ठः क्रूरराशौ विलग्नाद्यस्मिन्राशौ तत्प्रदेशे व्रणोऽस्य ।
एवं प्रोक्तं यन्मया जन्मकाले चिह्नं रूपं तत्तदस्मिन्विधेयम्॥ ७॥

आद्ये हृतं निपतितं तदनु द्वितीये द्रव्यं च विस्मृतमथो यदि वा तृतीये ।
द्रेष्काणकेषु परिकल्प्यमिदं क्रमेण वाच्यं हृतं तदपि वेश्ममुखेऽन्तरेऽन्त्ये॥ ८॥

ग्रहैर्दिशः केन्द्रगतैर्विचिन्त्या विलग्नराशेस्तदसम्भवे वा ।
विलग्नमध्याच्चलितैर्नवांशैर्विचिन्तनीयानि हि योजनानि॥ ९॥

शुक्रे धने देवगुरौ व्ययस्थे मूर्तौ शुभे वा हृतलब्धिरुक्ता ।
होरेन्दुयुक्तालयदिङ्मुखेषु सूर्येण लग्नाधिपराशिभूमौ॥ १०॥

पूर्णः शशी यदि विलग्नतः शुभो वा शीर्षोदये यदि पुनः शुभदृष्टिदृष्टः ।
लाभस्थितो बलयुतो यदि वा शुभः स्यात् नष्टस्य लाभमचिरेण ततः करोति॥ ११॥

लग्नाद्द्वितीये यदि वा तृतीये शुभेन युक्ते हिबुकेऽथवा स्यात् ।
सौम्यैः सुहृत्सप्तदशस्थितैर्वा निःसंशयं चोरितवस्तुलाभः॥ १२॥

लग्ने सम्पूर्णतनुर्जीवेन सितेन वीक्षितश्चन्द्रः ।
केन्द्रोपचयस्थैर्वा यदि सौम्यैः स्वोपचयगैराप्तिः॥ १३॥

लग्ने पूर्णश्चन्द्रो जीवः शुक्रो बुधोऽपि वा भवति ।
लभतेऽपहृतं द्रव्यं शुभयुक्ते सप्तमे यदि वा॥ १४॥

लग्नात्पातालाद्वा द्वितीयस्थोऽथवा तृतीयस्थः ।
भवति शुभग्रहश्चेन्नूनं प्रश्ने नष्टं धनं लभते॥ १५॥

पापविलग्नं पापे पश्यति नष्टं विनष्टमेव स्यात् ।
शुभखगलग्ने तु शुभैर्दृष्टे नष्टाप्तिरेष्टव्या॥ १६॥

सिंहालिकुम्भा यदि पापवीक्षिता युताः स्मरस्थाः स्वनवांशगामिनः ।
तदा विनष्टं त्वथवा बलान्विते कुजेऽष्टमस्थे यदि तन्नवांशे॥ १७॥

## ॥ १० मनोमुष्टिचिन्ताध्यायः॥

लग्नस्थः शशिबुधवीक्षितः सुधांशुश्चान्द्रिर्वा कथयति चिन्तितां कुमारीम् ।
वृद्धां स्त्रीं शनिरिनगीष्पती प्रसूतां शुक्रारावथ तरुणीं नरेऽपि चैवम्॥ १॥

अस्ते सितार्करविजैः परकीयजाया स्वीया गुरौ शशिनि तत्तनये च वेश्या ।
वाच्या वयश्च शशिवत्परिचिन्तनीयं सौरेऽन्त्यजातिरितरैरपि चिन्तिता स्यात्॥
२॥

लग्ने ग्रहैरात्मसमो बलस्थैर्भ्राता तृतीयैस्तनयः सुतस्थैः ।
माता चतुर्थैरथवा स्वसा स्याच्छत्रुस्थितैः शत्रुगतैव चिन्ता॥ ३॥

भार्या भवेत्सप्तमगैरमीभिर्धर्माश्रितो धर्मसमाश्रितैश्च ।
खस्थैर्गुरुः स्वांशपमित्रशत्रुस्थानेषु तद्वद्बलवत्सु वाच्यम्॥ ४॥

भागे चरे चरविलग्नगते च मध्याद् भ्रष्टप्रवासविषया भवतीह चिन्ता ।
भ्रष्टः स चेद्भवति सप्तमतस्तदा तु व्यावर्तते यदि न वक्रगतो ग्रहौऽसौ॥ ५॥

दीर्घास्तुलालिमृगनायककन्यकाः स्युर्मध्या धनुर्मकरकर्कटयुग्मसंज्ञाः ।
ह्रस्वाश्च मेषवृषमीनघटाः प्रदिष्टा वस्तुप्रमाणमपि राशिसमानमेव॥ ६॥

रक्तौ सूर्यमहीसुतौ शशिसितौ श्वेतौ सुधादीधितेः
सूनुः स्याद्धरिताकृतिः सुरगुरुः पीतः शनिः श्यामलः ।
सूर्यः स्याच्चतुरस्त्रकः क्षितिसुतो वृत्तस्तथा रंध्रवान्
सौम्यो दीर्घतनुस्तथा शशधरो दीर्घाकृतिः सुंदरः॥ ७॥

जीवो वृत्तवपुः सितस्त्वतिकृशः सौरिश्च दीर्घाकृति-
-र्मध्ये रंध्रसमन्वितश्च कथितं रूपं ग्रहाणामिदम् ।
इत्येवं कृतचिन्तितादिविषयप्रश्नेषु वर्णाकृती
द्रव्यस्यापि बलान्वितग्रहवशान्निःसंशयं निर्दिशेत्॥ ८॥

लग्ने वाभ्युदितं त्रिकोणभवने स्वांशं निजांशस्थितो
यः कश्चिद्ग्रह ईक्षते तदिह वा स्याद्धातुचिन्ता ध्रुवम् ।
अन्यांशे समवस्थितः पुनरसौ जीवस्य चिन्ताकरौ मूलस्यापि
परांशके परिगतः पश्यन् परांशं ग्रहः॥ ९॥

विद्याद्ग्रहे तु विषमे किल धातुमूल जीवान् समे तु विपरीतमिदं विचिन्त्यम् ।
लग्नांशकक्रमवशाद्गणनीयमेवं संक्षेप एष विवृतिस्त्वतिचिन्तनेन॥ १०॥

बलिनौ भास्करभौमौ धातुकरौ संस्थितौ प्रश्ने ।
मूलकरौ शनिसौम्यौ शशिगुरुभृगुजास्तथा जीवाः॥ ११॥

मेषे सिंहे वृश्चिके वा विलग्ने भौमार्काभ्यामन्विते वीक्षिते वा ।
धातोश्चिन्तां सौरिचन्द्रात्मजाभ्यां मूलं युग्मे कुम्भकन्यामृगेषु॥ १२॥

मीनकर्कवृषचापतौलिभिश्चन्द्रशुक्रगुरुभिर्युतेक्षितैः ।
जीवमाहुरिति मिश्रितं धनं मिश्रितग्रहयुतेक्षणात्तथा॥ १३॥

॥ ११ वृष्टिनिर्णयाध्यायः॥

चन्द्रार्कयोः शनिसितौ यदि सप्तमस्थौ तुर्येऽष्टमे च भवतो यदि वा विलग्नात् ।
स्यातां धने च सहजे यदि तौ विलग्नाद्वर्षासु वर्षणमचिरेण तदा विधत्तः॥ १॥

पक्षे सिते सलिलराशिगताः शुभाश्चेत् केन्द्रद्वितीयसहजालयगाश्च सम्यक् ।
चन्द्रोऽथवा सलिलराशिविलग्नगश्चेत् वृष्टिं वदेन्नियतमेव तदा धरित्र्याम्॥ २॥

कर्कटमृगमीनानामुदये चन्द्रं सितोऽपि वृष्टिकरः ।
तद्वत्केन्द्रोपगतौ सितचन्द्रौ वा शुभैर्दृष्टौ॥ ३॥

शीतद्युतिः सलिलराशि विलग्नगामी वीर्यान्वितेन भृगुजेन निरीक्ष्यमाणः ।
वृष्टिं करोति महतीं भृगुजोऽपितद्वच्छीतांशुना बलयुतेन विलोकितश्चेत्॥ ४॥

---

॥ १२ विवाहविचाराध्यायः॥

लग्नाच्छशी त्रिमदनायसुतारिसंस्थः सूर्यामरेज्यशशिजैरवलोक्यमानः ।
प्रष्टुर्भवेन्नियतमेव विवाहदाता केन्द्रत्रिकोणभवनेश्वथवा शुभाश्च॥ १॥

अत्रैव यदि योगे स्याच्छुभः सप्तमवेश्मनि ।
तदा लभेत् सज्जायां पापश्चेद्रूपवर्जिताम्॥ २॥

समस्थिते सूर्यसुते वरस्य लभ्या भवेन्निश्चितमेव कन्या ।
अतोऽन्यथात्वं विषमस्थितेऽस्मिन्निःसंशयं प्रष्टुरुदाहरन्ति॥ ३॥

सप्तमवित्तोपचयस्थानस्थो गुरुनिरीक्षितश्चन्द्रः ।
विदधाति युवतिलाभं तन्नाशं पापयुतदृष्टः॥ ४॥

यस्य प्रश्नविलग्नात् षष्ठाष्टमराशिगो भवेच्चन्द्रः ।
व्यूढव्य तस्य नूनं मृत्युः स्यादष्टमे वर्षे॥ ५॥

यदि लग्नगतः क्रूरः पापस्तस्माच्चसप्तमे भवति ।
सप्तभिरेव तदाऽब्दैः पुंसो निधनं विनिर्देश्यम्॥ ६॥

एवं लग्नोपगते चन्द्रे तस्माच्च सप्तमे भौमे ।
परतो विवाहकालाज्जीवेन्मासाष्टकं स पुमान्॥ ७॥

उदयाष्टमराशिसंस्थिते भृगुपुत्रेऽप्यथवेन्दुनंदने ।
विधवा क्षितिजे तु सप्तमे म्रियते निश्चितमेव कन्यका॥ ८॥

दिवामणिः सप्तमगो लग्नात्कन्यां मृतप्रजां कुरुते ।
कुलटामुदयोपगतः कुरुते नैवात्र संदेहः॥ ९॥

सक्रूरौ कुरुतोऽमृतांशुशशिजौ षष्ठे स्त्रियं दुर्भगां
कुर्वाते शशिभार्गवौ च कुलटामाये च जायास्थितौ ।
अत्रैवेन्दुजभार्गवौ जनयतो वैधव्यमावश्यकं
प्रत्येकं च सपापकैर्यदि ततोऽवश्यं तु वेश्या भवेत्॥ १०॥

लग्नात्स्मरेशत्रिसुतारिगश्चेद् गुर्वर्कसौम्यैः शशभृन्न चान्यैः ।
दृष्टो दिशेदाशु तदा विवाहं चिरात्स विघ्नं त्वशुभेक्षितश्चेत्॥ ११॥

लग्नगं शशिसुतं शशिनं वा वीक्षते बलयुतो यदि शुक्रः ।
योषिदाप्तिरचिरेण तदा स्यात्पापदृष्टिसहितं तु न हीति॥ १२॥

चरालयस्थौ यदि लग्नचन्द्रौ विलोक्यमानौ भृगुनन्दनेन ।
पापग्रहाः कण्टकसंगताश्चेत्प्रभूतकान्तां लभते तदानीम्॥ १३॥

---

॥ १३ स्त्रीपुंजन्माध्यायः॥

स्थिरे विलग्ने स्थिरलग्नगामिभिर्ग्रहैः शुभैश्चापि विलोकिते च ।
भृतं युवत्या ध्रुवमेव गर्भं ब्रूयादिति श्रीयवनाधिनाथः॥ १॥

लग्नतो विषमराशिगः शनिः पुत्रजन्मनि भवेत्सकारणम् ।
स्त्रीजनिश्च समगे शनैश्चरे प्राह दिव्यगणको बृहस्पतिः॥ २॥

पुरुषवर्गगते च तथोदये नरनभोगतिनाऽभिनिरीक्षिते ।
बलिनि निश्चितमेव सुतोद्भवो वरमपीह शुभं लभतेऽङ्गना॥ ३॥

उदयगते स्त्रीराशौ स्त्रीनवभागेऽपि पुंग्रहाऽदृष्टे ।
स्त्रीजन्म भवति तद्वत्स्त्रीद्रेष्काणोदये यवनः॥ ४॥

ओजर्क्षे पुरुषांशकेषु बलिभिर्लग्नार्कगुर्विन्दुभिः
पुंजन्म प्रवदेत्समांशकगतैर्युग्मेषु तैर्योषितः ।
गुर्वर्कौ विषमे नरं शशिसितौ वक्रश्च युग्मे स्त्रियं
धीलाभोपगतैः शुभैरुदयतः स्त्री गर्भयुक्ता ध्रुवम्॥ ५॥

चन्द्रलग्नान्तरगतैर्ग्रहैः स्युरूपसूतिकाः ।
बहिरन्तश्च चक्रार्धे दृश्याऽदृश्याऽन्यथा परे॥ ६॥

बलयुक्तौ स्वगृहांशेष्वर्कसितावुपचयर्क्षगौ पुंसाम् ।

स्त्रीणां वा कुजचन्द्रौ यदा तदा सम्भवति गर्भः॥ ७॥

सौरांशेऽब्जांशे वा चन्द्रः सौरान्वितोऽथवा हिबुके ।
शान्तो दीपो जन्मन्याधाने प्रश्नकाले वा॥ ८॥

पापद्वयमध्यसंस्थितौ लग्नेन्दूः न च सौम्यवीक्षितौ ।
युगपत्पृथगेव वा वदेन्नारी गर्भयुता विपद्यते॥ ९॥

भृगुसुतो वसुधातनयो गुरुर्दिनपतिः शशभृद्रविनन्दनः ।
शशिसुतोऽपि च लग्नपतीरविः शशधरोऽपि च मासपतिः क्रमात्॥ १०॥

एते यदा शत्रुगृहे वसन्ति युद्धे जिताः शत्रुभिरस्तगा वा ।
अन्यत्र वा पीडितदेहभाजो गर्भस्थ पातं जनयन्ति खेटाः॥ ११॥

रक्तस्तीक्ष्णतनुर्दिनेश उदितः सौन्दर्यवान् शीतगुः
क्रूराक्षोधरणीसुतोऽतिविनयी सोमात्मजोऽपि स्मृतः ।
जीवः पण्डितमण्डलीषु सहितः शुक्रश्च काणः शनिः
खञ्जो लग्नसमन्वितो निजफलं दत्ते बलं चिन्त्याम्॥ १२॥

॥ १४ प्रकीर्णाध्यायः॥

च्युतिर्लग्नाज्ज्ञेया हिबुकगृहतो वृद्धिरुदिता
प्रवासः स्यान्मध्याद्भवति विनिवृत्तिः स्मरगृहात् ।
गृहैरेतत्प्रश्नोदयसमयगैर्वाच्यमखिलं
प्रविष्टः स्वं गेहं हिबुकगृहगे प्रोषितपुमान्॥ १॥

लग्नाद्द्वितीयनिधनास्तमयेषु सौम्यैः पापैस्त्रिषष्ठभगतैश्च शुभं फलं स्यात् ।
व्यत्वासतः सपदि सेवकसेव्ययोश्च नित्यं प्रवासकलहौ प्रतिपादनीयौ॥ २॥

सौम्यैरष्टमसंस्थैर्द्वितीयसंस्थैस्तथैव दीर्घायुः ।
भवति प्रष्टुर्नित्यं तदन्यथात्वेऽन्यथात्वं स्यात्॥ ३॥

दशमचतुर्थैरेभिः सुखसम्पत् क्षतिस्तु विपरीते ।
वित्तैकादशसंस्थैर्वित्ताप्तिः प्रष्टुरादेश्या॥ ४॥

पापैर्विलग्ने परिपृच्छतस्तु शरीरपीडा कलहश्च वाच्यः ।
सुखक्षतिः स्यात्सुखगैर्गृहस्य भेदस्तथा बांधवविग्रहश्च॥ ५॥

अस्तस्थितैः स्याद्गमनस्य बाधः कर्मस्थितैः कर्मविनाशमाहुः ।

सर्वत्र चामुत्र शुभैर्न दृष्टे कृच्छ्रेण संसिद्धिमुदाहरन्ति॥ ६॥

शीतद्युतौ पापयुतेक्षिते वा नारीजनैः स्यात्सह विग्रहस्तु ।
सुखस्थितैर्द्यूनगतैश्च यद्वा तथैव पापैरवधारणीयः॥ ७॥

लग्नादष्टमगेऽर्के शुभयुक्ते वा शुभएन संदृष्टे ।
तस्माद्देशादन्यं देशं गत इति पिता तस्य॥ ८॥

सूर्यः कटुः शशधरो लवणो महीजस्तिक्तो विमिश्रितरसश्च शशांकसूनुः ।
जीवो भवेच्च मधुरोऽम्लकषायकौ च शुक्रार्कजौ च बलवानिह केन्द्रगामी॥ ९॥

यस्तत्र काले किल लग्नदृग् वा ग्रहो रसस्तस्य तु यः प्रदिष्टः ।
स एव तावत्प्रतिपादनीयो बलक्रमेण द्वितये रसाश्च॥ १०॥

सौम्यर्क्षसंस्थस्य स शोभनः स्यात्पापर्क्षसंस्थस्य तु नीरसः स्यात् ।
ग्रहस्य वक्रस्य रसं न भोक्ता भुङ्क्ते च पात्रे च पुनः प्रदत्तम्॥ ११॥

स्थिरे विलग्ने न गमागमौ स्तो न रोगशांतिर्न च वित्तनाशः ।
मृतो न नष्टो न पराभवोऽपि चरे विलग्ने विपरीतमेतत्॥ १२॥

विमिश्रितं स्याद्वितनौ तदंशद्वये चरस्थावरवद्वदन्ति ।
शुभेक्षणाल्लग्नशशांकयोर्वा भवेच्छुभं चाशुभमन्यथा तु॥ १३॥

कंदृक्श्रोत्रनसाकपोलहनवो वक्रं च होरादय-
-स्तेकण्ठासकबाहुपार्श्वहृदयक्रोडानि नाभिस्ततः ।
वस्तिः शिश्नगुदे ततश्च वृषणावूरु ततो जानुनी
जंघांघ्रीत्युभयत्र वा समुदितै द्रेष्काणभागैस्त्रिधा॥ १४॥

तस्मिन्पापयुते व्रणः शुभयुते दृष्टे च लक्ष्मादिशे-
-त्स्वक्षांशस्थिरसंयुते च सहजः स्यादन्यथाऽऽगंतुकः ।
मन्देऽश्मानिलजोऽग्निशास्त्रविषजो भौमे बुधे भूभवः
सूर्ये काष्ठचतुष्पदेन हिमगौ शृङ्गाब्जजोऽन्यैः शुभः॥ १५॥

समनुपतिता यस्मिन्भागे त्रयः सबुधा ग्रहा भवति
नियमात्तस्यावाप्तिः शुभेष्वशुभेषु वा ।
व्रणकृदशुभः षष्ठो लग्नात्तनौ भसमाश्रिते
तिलकमसकृद्दृष्टः सौम्यैर्भवेत्स च लक्ष्मवान्॥ १६॥

क्रियः शिरोवक्त्रगमी वृषोऽन्यः पादांसकौ पृष्ठमुरोऽथपार्श्वे ।

कुक्षिस्त्वपानोंऽघ्र्यथ मेढ्रमुष्कौ स्फिक्पुच्छमित्याह चतुष्पदांगे॥ १७॥

शंकुच्छायांगुलितो ज्ञात्वा तत्काललग्नलिप्तास्तु ।
छायांगुलैर्विगुणिता अथ पृथक् सप्तभिर्विभजेत्॥ १८॥

शेषग्रहगुणकारोऽर्केन्दुकुजज्ञेज्यशुक्रसुरीणाम् ।
पंचैकविंश मनवो नवाष्ट वह्नीश संज्ञाश्च॥ १९॥

( ५ ) ( २१ ) ( १४ ) ( ९ ) ( ८ ) ( ३ ) ( ११ ) हत्वा स्मरावशेषे स्यादुदयः शुभग्रहस्य तदा ।
अभिमतसिद्धिः प्रष्टुर्न क्रूरस्योदये किंचित्॥ २०॥

गुणकारैक्यविभक्ते तस्मिन् सूर्यादिगुणकपरिशुद्धे ।
यस्य न शुद्ध्यति वर्गो विज्ञेयस्तद्वशात्कालः॥ २१॥

भौमदिवाकरशेषे दिवसाः शुक्रेन्दुशेषतः पक्षाः ।
सुरगुरुशेषे मासाः सौम्ये ऋतवः शनावब्दाः॥ २२॥

आधाने तदनु जये पराजये वा शत्रूणां निधनविधौ समागमे वा ।
अर्थाप्तौ शुभमशुभं च सर्व कालं पृच्छायां समयमिमं विचिन्त्य वाच्यम्॥ २३॥

रवौ विलग्ने ज्वलनः प्रदीपो रक्तं च वस्त्रं नृप-दर्शनं च ।
श्वेतं च वस्त्रं सितपुष्पगन्धा नारी च पीयूषमयूखगर्भे॥ २४॥

महीसुते विद्रुमहेमरक्तस्त्रावस्तथैवार्द्रमृगादिमांसम् ।
शशांकपुत्रे नभसि प्रयाणं जीवे सुरैर्बन्धुजनेन योगः॥ २५॥

शुक्रे सलिलोत्तरणं तुंगाक्रमणं खरांशुपुत्रे च ।
लग्नस्थे वक्तव्यं स्वप्नप्रश्ने विमिश्रितं मिश्रैः॥ २६॥

शत्रुग्रहनीचगृहगैर्दुःस्वप्नो निर्जितैर्ग्रहैर्वाच्यः ।
रविकिरणलुप्तकायैः स्वप्ने प्रष्टुर्भवेद्भंगः॥ २७॥

लग्नचन्द्रान्तरालसंख्यया फलपाककालो वाच्यः ।
स्वस्वप्नान्तरे यं निरूप्यं पूर्वपूर्ववदित्येवं प्राह यवनेश्वरः॥ २८॥

अकचटतपयशवर्गा रविकुजसितसौम्यजीवसौरीणाम् ।
चन्द्रस्य च निर्दिष्टा प्रश्ने प्रथमोद्भवम् वर्णम्॥ २९॥

ज्ञात्वा तस्माल्लग्नं संगृह्य शुभाशुभं वदेत्प्रष्टुः ।
वर्गादिमध्यचरमैर्वर्णैः प्रश्नोद्भवैर्विषमम्॥ ३०॥

राशिं लग्नं प्रवदेच्छेषैर्युग्मं सितज्ञजीवानाम् ।
कुजरविजयोश्च नैवं रविशशिनोरेकराशित्वात्॥ ३१॥

तस्मात्प्राग्वत्प्रवदेत्पृच्छासमये शुभाशुभं सर्वम् ।
कालस्याविज्ञानादेतच्चिन्त्यं सदा प्रश्ने॥ ३२॥

॥ १५ लग्नचिन्ताध्यायः॥

देहः कोशो योधो वाह्यं मंत्रः शत्रुर्मार्गोऽथायुः ।
चित्तं कर्म प्राप्तिमन्त्री प्राग्लग्नाद्या भावाश्चिन्त्याः॥ १॥

त्रिलाभवर्जं रविसौरिभौमा निघ्नन्ति नो कर्म च सूर्यभौमौ ।
पुष्णन्ति सौम्या रिपुराशिवर्ज्यं नास्तं भृगुर्मृत्युमिनर्क्षमिन्दुः॥ २॥

लग्नोपगतैः सौम्यैरारोग्यं वित्तसौख्यं च ।
अर्थस्थैरर्थचयो योधविवृद्धिस्तृतीयस्थैः॥ ३॥

वाहनसुहृदां वृद्धिश्चतुर्थगैः पंचमैस्तु मन्त्रबलम् ।
रिपुनाशं षष्ठस्था भृगुवर्ज्यं सप्तमेऽध्वहिताः॥ ४॥

रक्षत्यायुर्निधने शशिवर्ज्यं नवमभे यशः सम्पत् ।
कर्मणि सिद्धिर्लाभो बलसंघातश्च दशमाद्यैः॥ ५॥

भौमार्कार्किशशांकैर्लग्ने वधबन्धमरणसंत्रासाः ।
अर्थक्षयो द्वितीयैस्तृतीय संस्थैर्यशो द्युतिमत्॥ ६॥

वाहनमित्रवियोगो मन्त्रस्रावो रिपुक्षयश्चेति ।
हिबुकादिषु सप्तमगैः स्वविषयनाशो भृगुसुते च॥ ७॥

मृत्युर्निधनोपगतैः सेनाव्यसनं महन्नवमस्थैः ।
दशमस्थौ कुजसूर्यौ जयदौ भङ्गप्रदः सौरिः॥ ८॥

जय एकादशसंस्थैः क्रूरैरन्त्योपगैः स्वबलभेदः ।
उपचयवर्जं सौम्यैर्यत्तत्पापैर्विपर्यस्तम्॥ ९॥

क्रूरोऽप्यनुकूलस्थः शस्तो लग्ने शुभोऽपि नानिष्टः ।
वक्री न शुभः केन्द्रे तदहस्तद्वर्गलग्नं च॥ १०॥

प्रश्नगतद्रेष्काणे राजा नेता द्वितीयेऽस्य ।

परतो गणपुरोहितभिषजां परतोऽस्य भृत्यानाम्॥ ११॥

स्थानपराक्रमचिन्ता परतो व्यवहारनृपसैन्ये ।
अभ्यवहार्यं शयनासने च तत्पंचसु क्रमशः॥ १२॥

यानासनशय्यावाहनानि दशमे परतोऽन्नपानानि ।
वाहनयोधाः परतस्त्रयोदशेऽपि युवराजः॥ १३॥

ज्ञेयं बलं प्रयातुर्मन्त्रस्य निश्चयश्च तत्परतः ।
परतः पंचदशाद्ये द्रेष्काणचतुष्टये रिपवः॥ १४॥

एकोनविंशतितमे सैनिकशयने क्षणानि परतोऽर्थः ।
परतोऽस्य दण्डनेता सैन्यस्योपद्रवः परतः॥ १५॥

सेनाछिद्रं तस्मात्सेनानेता भवेच्चतुर्विंशे ।
सेनारोग्यं सैन्यं चतुःपटंच क्रमात्रितये॥ १६॥

कार्यं कोशः फलसिद्धयस्त्रये भूभुजस्त्रये परतः ।
धर्मक्रियार्थयोधार्चनं च यात्रासमाप्तिश्च॥ १७॥

इत्युदयाद्या भावाद्रेष्काणैर्ये मयाऽऽदिष्टाः ।
सदसत्फलमादेश्यं सदसद्युतवीक्षणात्तेषाम्॥ १८॥

नवमांशे तिग्मांशोर्वाहननाशो विलग्नसम्प्राप्ते ।
कृच्छ्रात् स्वगृहगमनं प्रतापमृदुला च चन्द्रांशे॥ १९॥

कौजेऽग्निभयं बौधे मित्र प्राप्तिर्धनागमो जैवे ।
भोगविवृद्धि शौक्रे भृत्यविनाशो रविसुतांशे च॥ २०॥

यदुदयति फलं प्रदिष्टं जनयति तस्य नवांशको विलग्ने ।
शुभभवननवांशके सहायं रिपुबलभाग उपैति यातुरर्थात्॥ २१॥

शुभर्क्षे तन्नवांशे च यो याति मनुजेश्वरः ।
शत्रुबलान्नेता साहाय्यमुपगच्छति॥ २२॥

यत्प्रोक्तं राश्युदये द्वादशभागेऽपि तत्फलं वाच्यम् ।
यच्च नवांशकविहितं त्रिंशांशस्योदये तत्स्यात्॥ २३॥

उदयमुदयपं वा जन्मपं जन्मभं वा तदुपचयगृहं वा वीक्ष्य लग्ने यियासोः ।
विनिहतमरिपक्षं विद्धि शत्रोरिदं वा यदि हिबुकसमेतं पृच्छतोऽस्तस्थितं वा॥ २४॥

शत्रोर्होरा राशिस्तदधिपतिर्जन्मभं तदीशो वा ।
यद्यस्ते हिबुके वा तथापि शत्रुर्हतो वाच्यः॥ २५॥

क्षुत्तृष्णार्तिर्मार्गनाशोऽक्षिरोगः क्लेशस्याप्तिस्तिग्मगोः प्राग्विलग्ने ।
शस्तं चान्द्रे देवतार्थं स्वदेशे कौजे पित्तव्यालशस्त्राग्निपीडाः॥ २६॥

बौधे तुष्टिर्वांछिताप्तिर्यशश्च जैवेऽर्थाप्तिः स्थानलाभोऽरिनाशः ।
स्त्रीरत्नाप्तिः कार्यसिद्धिश्च शौक्रे मान्दे वाह्विव्याधिनीचापमाना॥ २७॥

वृषवृश्चिककर्कटैर्नृणामनुकूलैरपि लग्नमाश्रितैः ।
गमनं च वदन्त्यशोभनं मुनयोऽन्त्यर्क्षसमाश्रितैरपि॥ २८॥

मीने कुटिलो मार्गो भवति तदंशेऽन्यराशिलग्नेऽपि ।
नो यानमाप्यलग्ने कार्यं तेषां नवांशेऽपि॥ २९॥

सर्वं प्रमाणं मुनिनोदितत्वात्किं त्वत्र होराबलमेव योग्यम् ।
यस्मिन्सहस्रांशुरवस्थितोऽर्धे तिर्यङ्मुखी सा गणयेत्ततोऽन्याः॥ ३०॥

धत्ते वांछितकार्यमूर्ध्ववदना क्लेशाद्विना लग्नगा
क्लेशायासपरिक्षयांश्चकुरुते तिर्यङ्मुखी गच्छतः ।
सैन्यभ्रंशमधोमुखी प्रकुरुते कृच्छ्राद्गृहे चागमं
सर्वाः पुष्टफलप्रदाः स्वपतिना दृष्टा न पापग्रहैः॥ ३१॥

आरुद्रमीशा रविभौमजीव विद्भार्गवैनीन्दव इत्यतोऽगुः ।
यामार्धमिन्द्रानिलकालशंभुतोयाग्निचन्द्रासुरमध्यतोऽन्यत्॥ ३२॥

वार प्रवृत्तेर्घटिका द्विनिघ्नाः कालाख्यहोरापतयः शराप्ताः ।
दिनाधिपाद्या रविशुक्रसौम्यशशांक सौरीज्यकुजाः क्रमेण॥ ३३॥

व्यतिपातविष्टिवैधृतिपापग्रहलग्नदिवसेषु ।
चौर्यावस्कन्दानृतसंग्रामाः सिद्धिमायान्ति॥ ३४॥

प्राच्यादिदिक्षु मेषाद्याः स्वपंचनवमैर्युताः ।
तत्रगे यामिनीनाथे तदाशागच्छतोऽग्रतः॥ ३५॥

ओजदण्डे पुरश्चन्द्रे पृष्ठेराहौ रणेजयः ।
सिद्धिर्दक्षिणगे चन्द्रे हानिर्वामे परे मृतिः॥ ३६॥

यात्रादिगीशाद्यदि पंचमेऽन्यो गृहे ग्रहो वीर्ययुतोऽवतिष्ठेत् ।
समुद्यताशाकथितानि भङ्क्त्वा फलानि वीर्यान्नयति स्वकाष्ठाम्॥ ३७॥

एकोऽपि जीवज्ञसिताऽसितानां कुजात्त्रिकोणे रवितोऽथवेन्दुः ।
यत्रोद्यतस्तत्र न याति याता तयोर्बलीयान्नयति स्वकाष्ठाम्॥ ३८॥

परस्परं सौरिकुजौ रवीन्दू त्रिकोणगौ भार्गवलोहितौ च ।
फलं यदुक्तं तदशेषमेव विनाश्य पश्चात्स्वदिशं नयेताम्॥ ३९॥

ताराग्रहश्चेत्क्षितिजात्त्रिकोणे सूर्यादपि स्याद्यदि वा शशांकः ।
दिगीश्वरात्पंचमगो बली वा ग्रहः स्वकाष्ठां नयति प्रसह्य॥ ४०॥

दृष्टाऽदृष्टफलास्यै शास्त्रं हृदये निधाय मिहिरस्य ।
दैवज्ञवल्लभाख्यं दृष्ट्वा प्रश्नं वदेत्तज्ज्ञः॥ ४१॥

यदुपचितमन्यजन्मनि शुभाऽशुभं तस्य कर्मणः पंक्तिम् ।
व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव॥ ४२॥

आदित्यदासतनयस्तदवाप्तबोधः कापित्थलः सवितृलब्धवरप्रसादः ।
आवन्तिको मुनिमतान्यवलोक्य यत्नादेतां वराहमिहिरो रचयांचकार॥ ४३॥

॥ श्रीँ॥

Summary and Transliteration by Manish Shrivastaw. shrimanishmaharaj at yahoo.co.in

For the joy and enlightenment of lovers of Sanskrit and Astrology, only for personal

reading and use, should not be exploited commercially by any means conceivable.

ग्रंथ ज्ञातव्य    Index


| अध्याय | नाम | श्लोक संख्या |
|---|---|---|
| १ | प्रश्नावतार | १३ |
| २ | शुभाऽशुभ | २६ |
| ३ | लाभाऽलाभ | ५ |
| ४ | सामान्यगमाऽऽगम | १० |
| ५ | शत्रुगमागम | १२ |
| ६ | प्रवासचिन्ता | ११ |
| ७ | जयपराजय | २९ |
| ८ | रोगशुभ | ८ |
| ९ | नष्टलाभाऽलाभ | १७ |

| | | |
|---|---|---|
| १० | मनोमुष्टिचिन्ता | १३ |
| ११ | वृष्टिनिर्णय | ४ |
| १२ | विवाहविचार | १३ |
| १३ | स्त्रीपुंजन्म | १२ |
| १४ | प्रकीर्ण | ३२ |
| १५ | लग्नचिन्ता | ४३ |

*daivaGYa vallabhA Astrologer's beloved by VarAhmihir*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*